National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022; 1(43): 214-218
© 2022 NJHSR
www.sanskritarticle.com

**Puspanjali Paikaray**
Research Scholar.
Department of Sanskrit,
Utkal University,
Bhubaneswar

**Correspondence:**
**Puspanjali Paikaray**
Research Scholar.
Department of Sanskrit,
Utkal University,
Bhubaneswar

# भवभूतिकृतिषु पुरुषार्थचतुष्टयम्

**Puspanjali Paikaray**

**उपक्रम:**

कस्यापि राष्टस्य विकाश: तत्र तत्र स्थितानां नागरिकाणां उन्नति उपरि पर्यवसित: भवति। यतोहि व्यक्ते: विकासेन राष्ट्रस्य विकास: सम्भवति। अस्मिन् प्रसङ्गे पुरुषार्थचतुष्टस्य अतीव महत्वपूर्ण भूमिका वर्त्तते। भारतीयचिन्तनशल्यां पुरुषार्थस्य तात्पर्यं यथा दृश्यते अन्यासु सभ्यतासु प्रायस: तद् विरU: एव। भारतीयसंस्कृते: प्रमुखं माहात्म्यं भवति पुरुषार्थचतुष्टयं धर्मार्थकाममोक्षश्च इति। समग्रसंसारे एतान् चतुष्टयान् अतिरीच्य पञ्चम: पदार्थ: नास्ति यद् मनुष्यै: प्राप्तुं इष्यते। एतै: चतुष्टै: मनुष्य: पूर्णतां प्राप्नोति। मानवजन्यन: सम्पूर्णविकाश: पुरूषार्थचतुष्टयेन एव जायते। एतेषु चतुर्षु परमपुरुषार्थ: मोक्ष: एव, तदतिरिक्तं त्रयं मोक्षप्राप्ति अर्थं आधारभूतमेव। एतस्य चतुष्टस्य निराकरणेन मनुष्य जन्मन: कोऽपि अर्थ: न दृश्यते। अतएव उक्तमस्ति–

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।**
**अजागलस्तनस्यैव तस्य जन्म निरर्थकम्।।**

**पुरुषार्थविवेचनम् -**

वामनपुराणे पुरुषार्थचतुष्टयस्य कल्पना सदाचाररुपवृक्षेण सह कृतास्ति। सदाचाररुपवृक्ष: पुरुषार्थ-चतुष्टयान् प्रददाति। यथा धर्म: तस्य वृक्षस्य जड, अर्थश्च शाखा, काम पुष्प च तथा मोक्ष: फलमेव।

**धर्मोस्य मूलं धनमास्य शाखा पुष्पं च काम:।**
**पुष्पं च काम: फलस्य मोक्षा:।।**[1]

भारतीयसंस्कृतौ पुरुषार्थस्य यथा विवेचनं कृतमस्ति तथैव मार्गेण भवभूतिकृतिषोपि उल्लेख: वर्त्तते। पुरुषार्थचतुष्टयेषु धर्म: प्रथमं सोपानम् अस्ति। धर्मस्य तावत् एवमर्थ: भवति यत् कल्याणै कर्मभि: तथा आचरणै: सांसारिक एवं च पारलौकिक सुखप्राप्ति:। अतएव वैशेषिकसूत्रे उक्तमस्ति-" **यातेऽभ्युदयानि: श्रेयससिद्धि: स धर्म:।।**"[2]

" **धारणात् धर्म इत्याहु:**"इति मनुस्मुत्यनुसारं धर्म: तदैव तत्वम् येन संसारस्य समस्त-कार्याणि संचाल्यन्ते। अनेन प्रकारेण भवभूति-नाटकेषु अपि धर्मस्य मार्गद्वयेन कृत: दृश्यते, प्रथमं तावत् धर्म सामान्यरुपं, द्वितीयं तावत् धर्म: विशेषरूपं। दैनन्दिनजीवने यानि यानि कर्माणि मनुष्यै: सम्पाद्यन्ते तानि मानवीय: धर्म: इति उच्यते, यथा- धैर्य: मनोनिग्रह:- अस्तेय पवित्रता इन्द्रियनिग्रह: वृद्धि: विद्या क्रोधादयश्च। भवभूति विरचित महावीरचरिते तथा उत्तररामचरिते श्रीरामस्य एते गुणा: वर्णिता: सन्ति। अत: महावीरचरिते उक्तम् अस्ति श्रीराम: धर्मस्य रक्षक: आसीत् यथा

**" निसर्गेण स धर्मस्य गोप्ता, धर्मदुहोवयम्"**[3]

महावीरचरितस्य अवलोकनेन किञ्चन विचित्रमस्यं अस्माकं पुरत: आगच्छति। श्रीरामस्य धैर्यक्षमाक्रोधरहितानि गुणान् द्रष्टवा जामदग्न्या: कथयति स्म हे राम ! तव हृदयवत् आकृत्या सुन्दरोऽस्ति, तव गुणा: तर्करहिता: भवन्ति त्वं च मुर्हुमुर्हु मम स्मरणे आगच्छसि। जामदग्न्यस्य अस्या:

उक्तेः बुध्यते यत् शरीरस्य सौन्दर्यं बर्हिवस्तुप्रभावेन न जायते अपि च शरीरस्य वौद्धिकसौन्दर्यवर्धनार्थम् अन्तः करणस्य महती भूमिका वर्त्तते तदेव उक्तमस्ति महावीरचरिते-

**राम राम नयनाभिरामतामाशयस्य सहशी समुद्रहन्।**
**अप्रतर्थ्येगुणरामणीयकः सर्वथैव हृद्यंगमाऽसि में।।[4]**

भवभूतिनाटकेषु विषयवस्तुनः अरभ्यः धर्माधर्मप्रसङ्गेनैव आरभ्यते त्रिषु नाटकेषु एव सर्वनायकाः सर्वाश्च नायिकाः तथा च अन्ये सहयोगिनः धर्मपरायणाः मानवीयगुणसम्पनाः आसन्। न केवलम् श्रीरामः अपि च लवस्य माधुर्यपूर्णं शरीरं द्रृष्ट्वा तस्य कार्यशैली विषये अवगन्तुं शक्यते। अतः यदि अन्तःकरणदिशा पावनत्वं संस्थाप्यते तर्हि शरीरस्य वर्हिभोगोऽपि आकर्षणीयः जायते। प्रसङ्गेऽस्मिन् उत्तररामचरिते उच्यते-

**त्रातुं लोकानिव परिणतः कायवानस्त्रेवेदः**
**क्षात्रो धर्मः श्रित इव तनुं ब्रह्मकोषस्य गुप्त्यै।**
**सामर्थ्यानाभिव समुदयः संचयो व गुणाना**
**भाविर्भूय स्थितं इव जगत्पुण्य निर्माणराशिः।।[5]**

भवभूतिः स्वयंमेव स्वभावतः धार्मिकः आसीत्। वैदिकधर्मे तस्य प्रगाढः विश्वासः आसीत्। प्रायोगिकसमस्यानां समाधानं यदा शास्त्रं तुष्णो भवति तदानीं भवभूतिः स्वकृतिषु तस्यमार्गं परिस्करोति। महाकवेः भवभूतेः वैशिष्ट्यम् इदं भवति यत् लोककल्याणार्थं कदाचित् अस्माभिः सुगुणः भवति चेदपि व्यक्तिगतत्यागः करणीयः। अस्य उदाहरणं भवति लोककल्याणार्थं सीता निर्वासनम्। श्रीरामस्य चिन्तनम् एतादृशम् आसीत् यत् प्रजानां कल्याणार्थं प्रेम-दया तथा सुखादिनां त्यादः क्रियते चेत् कोऽपि दोषः नास्ति, तदेव मनुष्यस्य परमधर्मः। तदेव प्रसंगः उत्तररामचरिते भवभूतिना प्रदर्शितः-

**पुरुषार्थस्य तात्पर्यम् -**

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकानां मिश्चतोनास्ति में व्यथा।।[6]**

ये सज्जनाः भवन्ति तेषां आदेशः धर्म इति कथ्यते। यतोहि श्रीरामस्य कथानुसारं ऋषीणां वाणीं अर्थ एव अनुसरति, यथा- “ऋषिणां पुनराद्यानां वाचमर्थोऽनुधावति”भवभूतिना सुष्टुसमाज-स्थापनार्थं वर्णव्यवस्थायाः निर्धारितधर्मस्योपरि सहमतः आसीत्। सः अवगतः आसीत् ब्रह्मणानां धर्म ज्ञानार्जन, तथा च क्षत्रियाणां धर्मः धर्मानुसारं समाजस्य नियमानां। वर्णान्तरेषु धर्मान्तरस्य सह विरोधी आसीत्, भवभूतिः सम्यक्रुपेण अवगतः आसीत् समाजः विशृंखलितः स्यात् यदि एकस्य वर्णस्य वर्णः वर्णान्तरेण आचर्यते। अतएव भवभूति वर्णानुसारं कर्त्तव्यपालनेन समाजस्य उन्नतिः भवति इति महावीरचरिते उल्लीखितवान्। अपि च भवभूतिना भिन्नः भिन्नः आश्रमेषु भिन्नः भिन्नः धर्मनियमानां प्रणयने विश्वसति स्म तथापि परोपकार एव लोककल्याणार्थं यदि निर्धारित-नियमानां उल्लंघनः जायते तथापि तत्र कोऽपि दोषः न भवति इति अस्य मतम्।

**श्लाध्यो गुणैर्दूिजवरÞच निजÞचबन्धु-**
**स्तस्मिन् गृहानुपगते सदृशं किमेतत्।**
**विद्रूनापि प्रचलितस्तु यदेष मार्गा-**
**त्क्षत्रं हि तत्र विनयाय शमं भज त्वम्।।[7]**

एवं प्रकारेण भवभूतिनाटकेषु लौकिकधर्मेण सह विशिष्टधर्मस्यापि मूल्याङ्कनं कृतमस्ति। तदर्थमेव लोककल्याणार्थं श्रीराम वासभवनं त्यक्तत्वा विश्वामित्रेण सह वनं गच्छति स्म, तथा च त्रिलोकस्य कल्याणार्थं श्रीरामः स्वसुखम् अपि त्यक्तत्वा निर्वासनाय सीतां प्रेरितवान्। अस्मात् भवभूतेः विशिष्टधर्मस्य सूचना लभ्यते। यथा कालिदासः अभिज्ञानशाकुन्तले कथयति “प्रमाणमन्त कर्ण प्रवृत्तया” तद्वत् भवभूतिरपि स्वीकरोति वहुविधानां समस्यानां साधुजनानां अन्तःकरणमेव प्रमाणं भवति।

पुरुषार्थचतुष्टयेषु अर्थस्तावत् द्वितीयवस्तुः। सर्वैः ज्ञायते अर्थं विना संसारेऽस्मिन् किमपि साधयितुं न शक्यते। यस्य उपयोगेन मनुष्यः जीवति तथा विविधकार्याणि सम्पादयति तदेव अर्थः। “राष्ट्रस्य मूलमर्थः” इति कौटिल्यवचनानुसारं धनम् अर्थः इति उच्यते, परन्तु तत् धर्मसम्मतं भवितव्यम्। अन्यायमार्गेण यद् धनं उपार्ज्यते तद् पापाय भवति इति हेतो न्यायरहितमार्गेण उपार्जितार्थः निन्दितोऽस्ति भगर्वीतायाम् अतएव भगवता श्रीकृष्णेन गीतम् अस्ति। “ईहंते कामयोगार्थ मन्यायेननार्थ संययान्” एवं प्रकारेण प्रयोजनस्य पूर्त्यर्थं अर्थस्य आवश्यकता वर्त्तते एव, परन्तु तत् धर्मपरकं भवितव्यम् इति हेतोः पुरुषार्थचतुष्टयो धर्मात् अनन्तरम् अर्थस्य स्थानं दत्तम् अस्ति भारतीयमनिषीभिः। चिन्तनमिदम् आधारितकृत्य भवभूतिरपि स्वकृतौ निगदति यत् धनं लोककल्याणार्थं तत् अवश्यमेव सार्थकतां भजते। रसप्रधानत्वात् भवभूतिकृतिषु अर्थं संवध्य तत्र विशेषप्रयोगः यद्यपि न दृश्यते तथापि यदा प्रसङ्गः आगच्छति तदानीम् अर्थ शुद्रं उपलक्ष्य तत्र तत्र प्रयोगः दृश्यते, यथा ऋषिभिः प्रप्तास्त्र्ाणे लोककल्याणाय एव भगवता श्रीरामेण प्रयुक्तानि आसन्-

**न कम्नते झंझामरुति किलवाति प्रतिदिशं**
**समुन्मूर्च्छत्सारा: कुलशिखरिणः किंचिदापि ते।**
**न मर्यादा तेऽपि प्रतिजहति गाम्भीर्य गरिम-**
**स्फुरद्धार्ब्रह्माणोऽकलितमहिमानोऽम्बुनिधयः।।[8]**

अधर्ममार्गेण प्राप्तधर्मस्य चिरस्थायित्वं नास्ति यथा रावणेन अन्यायमार्गेण अर्जितं धनं तस्य कस्मिन् कार्येऽपि न प्राप्तम्। रावणः धर्मरहितत्वात् तस्य धन-जीवन-ऐश्वर्यं च सर्व विनिष्टम् आसीत्।

**भ्रन्तीः सप्ताधिकानां प्रविदधदरुणौर्चिषां चक्रबालै-**
**र्द्राग्वीराणामलक्ष्यप्रसृतिरतिसमुत्तप्तरौक्मालयेषु।**
**अर्धप्लुष्टापसर्पद्रर्जानचरभटोद्गाढकल्पान्तशङ्कं**
**लङ्कां प्रौढो हुताशः सह परिदलितोऽब्धोस्त्रिकूटेन लीढे।।[9]**

भवभूतिकृतिना विश्लेषणेन अयम् अपि दृष्टवौ आगच्छति यत् भवभूतिमतानुसारं पुत्रः धनमेव इति महावीरचरिते “ पुत्रभण्ड” एवं च उत्तररामचरिते “ शान्तं व रघुनन्दने तद्नभयम् तत्अपुत्रभाण्ड हि”। अस्मात् स्पष्टो भवति यत् पुत्र ऐश्वर्य-वत् भवति -

**तदस्मिन् ब्रह्माद्यैस्त्रिदशगुरुभिर्नाथितशमे**
**तपस्तेजोघाम्नि स्वयमुपनतब्रह्माणि गुरौ।**
**निवासे विद्यानामुपहितकुटुम्बव्यवहृति-**
**र्भवानवे श्लाघ्यो जगति गृहमेधी गृहवताम्।।**[10]

भवभूते अन्यमपि एकमं वैशिष्ट्यं भवति, तस्य दृष्ट्या प्रजानुरञ्जनमेवधनम् इति। तदर्थमेव प्रजानुरञ्जनरुपधनप्रास्यिर्थं प्रेमदया-सुखमपि उपेक्ष्य तेन साध्वी पतिव्रता तथा पवित्रा सीतापि परित्यक्ता। पुनरपि एतेषां त्यागेन तस्य मनसि दु:खस्य लेशोऽपि अनुभव: नासीत्। यतोहि प्रजानुरञ्जनमेव सूर्यवंशस्य परमपुरुषार्थ:। पुनरपि बंशेऽस्मिन् ये ये राजान: आसन् तेषु एतदेव कारणात् श्रीराम: पृथीमेव भाति इति हेतो: सीता उत्तररामचरिते स्पष्यति "अतएवराघवकूल धुरन्धर आर्यपुत्र: "

पुरुषार्थचतुष्टये काम: तृतीय तत्वमस्ति। काम:इत्यनेन कामनावासना वा अवगम्यते। धन- भवन- आभूषण- पुत्र-कलत्र-शरीर-इन्द्रिय-मन-विद्या-यश तथा अन्यादिनि प्रास्यार्थं य: प्रयाश: क्रियते, तस्य प्रत्यनन्तरं य: आनन्द: उपलक्ष्यते तद् कदाचित् सामान्यरूपेण काम: इति उच्यते परन्तु काम: सर्वदा धर्मसम्मत: भवितव्य:। अतएव भगवान श्रीकृष्ण: गीतायां कथयति " धर्मविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ" भवभूतिरपि स्व नाटकेषु धर्मसम्मत-कामस्य ग्रहणं कृतवान् तस्य मतानुसारं काम: लोककल्याणार्थं वण-व्यवस्थानुसारं क्रियते चेत् तद् मोक्ष-प्रदायक: भवति। महावीरचरिते-

**विजयिसहजमस्त्रैर्वीर्यमुच्छ्रायययिष्यञ्ग-**
**दुपकृतिबीजं मैथिलीं प्रापयिष्यन्।**
**दशमुखकुलघातश्लाघ्यकल्याणपात्रं धनुरत्नु-**
**जसहायं रामदेवं निनाय।।**[11]

इति धर्मपरककामवाक्यस्य प्रयोग: विश्वकल्याणार्थं प्रयुक्तमस्ति। मालतीमाधव-नाटकेऽपि विध्यानुसारं सर्वं कामयते। अत्र कामनाया: मूलभावना लोककल्याणं तथा प्रजानुरञ्जनमेव। यथा भवभूति: धर्मपरकमर्थं गृह्णाति तद्वत् लोककल्याणार्थं कामनानां प्राप्ति: परमपुरुषार्थं इति स्वीकरोति। सवासुकामनासु क्रियासु भवभूति: धर्म: स्थापयति च । तस्य मतानुसारं कर्त्तव्यं शास्त्रेषु निर्धारितं, तद्रीत्या सम्पादनीयं च, यथा ज्ञानार्जनं तथा यज्ञसम्पादनं ब्रह्मणानां कर्त्तव्य: तथा राष्ट्ररक्षा क्षत्रियानां कर्त्तव्य: अपि। "काम" इत्यनेन कदाचित् सम्भोग: इति अवगम्यते। परन्तु भवभूति मतानुसारं काम: कश्चन व्यापक: शब्द:।यस्य कस्यापि वस्तुन: प्राप्ति: काम इति वक्तुं शक्यते। अतएव वर्णव्यवस्थानुसारं तथा धर्मसंस्थापनार्थं स्वदायितनिर्वहणं काम इति वक्तुं शक्यते

**दुर्दान्तानां दमनविधय: क्षत्रियेष्वायतनते**
**दुर्दान्तस्त्वं वयमपि च ते क्षत्रिया: शासितार:।**
**सद्य: शान्तो भव किमपरं दम्यसे चाधुनैव**
**क: ब्रष्माण: प्रशमनपरा: क्षत्रधार्य क शस्त्रम्।।**[12]

विवाहप्रसंङ्गेऽपि कन्यावस्यो: अपेक्षया पितु: भूमिका गुरुत्वपूर्णा अस्ति इति भवभूति: मालतीमाधवे प्रोक्तवान्। कामवशत: मालती-माधवर्योमध्ये य: विवाहप्रसङ्ग: समागत: तत्र पितु: अनुमतिं विना पाणिग्रहणं कर्त्तुं न शक्यते इति मालतीमुखेन भवभूति: कथयति स्म। अत्र अस्माभि: अवगन्तुं शक्यते यत् कामना कीदृशी वा भवतु तदपि समाजग्राहया: तथा कुटुम्बग्रहया भवितव्या-

**ज्वलतु गगने रात्रौ रात्रावखण्डकल: शशी**
**दहतु मदन: किं वा मृत्यो: परेण विधास्यत:।**
**ममतु दयित: श्लाघ्यस्तातो जनन्यमलान्वया**
**कुलममलिनं न त्वेवायं जनो न च जीवितम्।।**[13]

कामस्य अर्थान्तर: वासनायुक्त-इच्छाशक्ति: अपि भवति। कामशब्द: व्यापकार्थे प्रयुक्तत्वात् नैतिकार्थे लोककल्याणार्थं तथा पार्थिवसुखार्थे इन्द्रियभोगार्थंमपि प्रयुर्यते। भवभूतिनाटकेषु काम-शब्द: न केवलं मैथुनार्थे अपि च परोपकारार्थे प्रयुज्यते। भवभूतिनाटकेषु कामनावासनापरक: यह विचार: प्रर्दर्शित: तत् धर्मानुशासित एव। भवभूतिकृतिषु काम: अर्थात रति: मर्यादा तथा लज्यार्थे प्रयुज्यतर। कामनाया: परिपूरिथ कदापि मर्यादाया: अतिक्रमणं न करणीयम् इति कदापि मर्यादाया: अतिक्रमणं न करणीयम् इति भवभूतिनाटकेषु द्रष्टुं शक्यते। उक्तम् अस्ति पञ्चवदाम् यदा शुर्पणखा श्रीरामं प्रति प्रेमनिवेदनं करोति स्म वयस: आधिक्यत्वदपि, तदानिम सा मर्यादाया: तथा लज्जया: उल्लेखनं करोति स्म।

**पुरुषार्थस्य आवश्यकता -**

**अनेकयुगजीविन्यास्त्रेता यस्यास्त्रयोदशी।**
**सा क्षीरकण्ठकं वत्सं वृषस्यन्ती न लज्जिता।।**[14]

महावीरचरितानुसारं सीता लज्याया: प्रतिभासीत्। श्रीराम: पुरूषोत्तम: तथा सौन्द्रर्यस्य प्रतीक:। श्रीरामस्य शान्तकमनीय शावलीनान्दमयंचित्तंशरीरं च दृष्ट्वा सीता श्रीरामं प्रति आकृष्यासीत्। तत्रापि यज्ञसंभुतां सीतं च दृष्ट्वा श्रीराम: तां प्रति प्रेरित: आसीत्। अस्मात् अवगम्यते यत् यद्यपि उभयोर्मध्ये काम-देवस्य प्रभाव: आसीत् तथापि तद् प्रभाव: दिव्य, नित्य तथा शाश्वत: श्च। कामदेवस्य प्रभावेन पीङिता सन्ती सीता अपि लज्यायुक्ता आसीत्।

**उत्पत्तिर्देवयजनाद् ब्रह्मवादी नृप: पिता।**
**सुप्रसन्नोज्ज्वला मूर्तिरस्यां स्नेहं करोति मे।।**[15]

महावीरचरिते यद्यपि कामभावस्य लौकिकभावना बहुलतया प्राप्तुं शक्यते तथापि यदा मनसि कामभावना जायते तदानीं भवभूतिमतानुसारं शरीरे मनसि च भावत्रयं संजायते यथा भित्ति: श्रम: लज्या: च तदेव उक्तमस्ति महावीरचरिते भवभूतिना-

**आतङ्कश्रमसाध्वसव्यतिकरोत्कम्प: कथं सहृता-**
**मङ्गैर्मुग्धमधूकपुष्परुचिभिर्लावण्यसारैरयम्।**
**उन्नद्धस्तनयुग्मकुड्मलगुरूश्वासावभुग्नस्य ते**
**मध्यस्य त्रिबलीतरङ्गकजुषो भङ्ग: प्रिये मा च भूत्।।**[16]

मालतीमाधवनाटकेऽपि मालतीमाधवयो: मध्ये कामभावस्य जाग्रा-तार्थं कामन्दको वहुप्रयासं करोति। अस्मात् ज्ञायते कामभावना तादृशी भावना अस्ति या मनसि कदाचित् स्वत: उदेति अथवा केनापि उदयितुं प्रयासं करोति इति भवभूतिनाटकपर्यालोचनेन अवगन्तुं शक्यते। किमपि वा भवतु कामन्दक्या: प्रभावेन उभयोर्मध्ये प्रेमभावना संजाता। तयोर्मध्ये तत्र तत्र शृङ्गारभावनाया: परिक्राश: आसीत्। मालत्या: मुखसौन्दयं अवलोक्य तथा पिङ्ति: आसीत् यद् भवभूति अधोल्लिखितप्रकारेण वर्णयति स्म

**उन्मीलन्मुकुलकरालकुन्दकोशप्रच्योतद्घनमकरन्दगन्धबन्धो**
**थामीषत्प्रचलविलोचनांनतांगीमालिंगन्पवन मम स्पृशांगमंगम्।।**[17]

यद्यपि भारतीयसाहित्यशास्त्रेषु कामभावं उररीकृत्य बहुधा वहुत्र च विविधं विश्लेषणं दृश्यते तथापि भवभूतिविरचितनाटकेषु रतिप्रसङ्ग किञ्चित् भिन्न: रुपेण माधवं प्रति आसक्तमासीत्, तस्या: एतादृशी: स्थिति: मर्यादातीता नासीत्। कामनाया: प्रखरतेजसा सा मर्यादाया: उल्लघनं कदापि न कृतवती। कामपिडीता: सन्त्यपि सा स्ववंश-परम्परां प्रतिक्षणं स्मरति च एतदेव भवभूते: वर्णनाया: वैशिष्टयं। परस्परयो: प्रेमनिबेदनवेलायां सा स्ववंशपरम्पराया: निष्कलङ्ककीर्तिअर्थ भजते स्म। सापि मालतीमाधवर्योर्पक्षया वंशजान् जीवन गुरुत्वपूर्ण इति सर्वदा चिन्तयति स्म-

**ज्वलतु गगने रात्रौ रात्रावखण्डकल: शशी**
**दहतु मदन: किं वा मृत्यो: परेण विधास्यत:।**
**मम तु दयित: श्लाध्यस्तातो जनन्यमलान्वया**
**कुलममलिनं न त्वेवायं जनो न च जीवितम्।।**[18]

भवभुतिमतानुसारं प्रेमसामान्यवस्तु नास्ति , प्रेम: कश्चन अन्त:करणगुण:, य: युवानां हृदि स्वत: जायते । अतएव भवभुत्यतीव कौतुहलेन कथयति यथा पदार्था: कदाचित् आन्तरिककारणेन परस्परं प्रति आकृष्टा: भवन्ति तद्वत् प्रेमोऽपि वाह्यवस्तु नाश्रियते,अपि च आन्तरिक: तथा अलौकिकस्नेहेन प्रेम्ण: उत्पति: जायते । तथा च उक्तं भवभुतिना –

**व्यतिषजति पदार्थनान्तर: कोऽपि हेतु**
**र्न खलु बहिरूपाधीन्प्रीतय: संश्रयन्ते ।**
**विकसति हि पतंगस्योदये पुण्डरीकं**
**द्रवति च हिमरश्मावुते चन्द्रकान्त: ।।**[19]

काम: कदाचित् अस्माभि: सामान्यरूपेण स्वीक्रियते,परन्तु कामभ-वनाया: संज्ञा महती अस्ति । कामैव संसारस्य मूलतत्वमस्ति यतोहि तेनैव सृष्टे: सर्जना जायते तथा च तद् क्रम: अबध्य: परन्तु काम: सर्वदा नैतिकतां तथा लोककल्याणार्थं प्रयुज्यते चेत् संसारस्य मङ्गलविधानि भविष्यति। अतएव कामवासना धर्मयुक्ता भवितव्या।

पुरूषार्थचतुष्टयस्य अभिमपर्याय: मोक्ष: इति। मोक्ष: परमपुरूषार्थ: इति उच्यते। मोक्षस्य सामान्यार्थ: त्याग: इति। आत्यत्मि-कदु:खविनाश: तथा निवृत्ति: मार्ग: मोक्ष: इति उच्यते। अतएव न्यायसूत्रे उक्तमस्ति “वाधालक्षणं दु:खम्” तथा “तदत्यन्ताविमोक्षोऽपवर्ग:” इति मोक्षावस्था परमानन्दस्य प्राप्ति: इति वेदान्तदर्शन: प्रतिपादयति। मोक्षावस्थायां जीव: स्वस्वरुपे अवतिष्ठति तदानीं तत्र दु:खं आनन्दश्च नानुभूयते। स्थितिरियं स्थितप्रज्ञ: इति कथ्यते। अत: गीतायां उक्तमस्ति-

**प्रजह्यति यदां कामान्सर्वान पार्थ मनोगतान्।**
**आत्मान्येवात्मना तुष्ट: स्थितप्रज्ञस्तदोच्यते।।**[20]
**दु:खेष्वनुद्विग्नमना: सुखेषु विगतस्पृह:।**
**वीतरागभय क्रोध: स्थितधीर्मुनिरुच्यते।।**[21]

**उपसंहार:-**

भवभूतिकृतिष्वपि मोक्षपरका: विचारा: परिदृश्यन्ते। भवभूति-विरचितनाटकत्रयं सम्यक्रूपेण विविच्यते चेत् अयं वेदान्तदर्शनस्य समर्थक: आसीत् तथा परमानन्द प्राप्ति: मोक्ष: इति तस्य मतम्। तस्यामतानुसारं मुमुक्षणा संसर्गेण आत्मज्ञानप्राप्ति: सम्भाव्यते। यथा विश्वामित्रेण सह सम्बन्ध कुशध्वजस्य स्थितिरासीत्। भवभूत्यनुसारं धर्मज्ञ: तथा साधुनां संयोगेन अज्ञानं दुरीभुय शाश्वतानन्दं प्राप्यते। तथा च उक्तम्-

**तमासिं ध्वंसन्ते परिणमति भूयानुपशम:**
**सकृत्संवादेऽपि प्रथत इह चामुत्र च शिभम्।**
**अथ प्रत्यासङ्क: कमपि महिमानं वितरति**
**प्रसन्नानां वाच: फलमपरिमेयं प्रसुवते।।**[22]

यद्यपि भवभूति: साहित्यिकासीत् तथापि तस्य उपनिषदां ज्ञानम् अपि आसीत्। याज्ञबल्कय: जनकाय ब्रह्मज्ञानं उपदिष्यवान्। भवभूते: प्रीति: उपनिषद्वाक्येषु अपि आसीत्। अतएव तेन आत्मज्ञानस्य समाजे प्रचारप्रसारार्थ महावीरचरिते उपनिषदवा-ख्यनां प्रयोग: अपि विहित:। एतादृश: प्रयोग: उत्तररामचरितेऽपि द्रष्टुं शक्यते। स्पष्टीयते अस्मात् यत् भवभूति: य: वेदान्तो आसीत् ब्रह्मज्ञानं संप्राप्य तेनैव मोक्षप्राप्ति: विहितव्या इति सर्वेषां मनुष्यणां आदर्श: भवितव्य:

**स एष राजा जनको मनीषि पुरोहितेनाङ्किरसेन गुप्त:।**
**आदित्यशिष्य: किल याज्ञवल्कयो यस्मै मुनिब्रह्मा परं विवत्रे।।**[23]

भवभूति: स्वकृतिषु प्रतिपादयति यत् जीवनमुक्ति: ब्रह्मज्ञानेनैव जायते। तदनन्तरं परमानन्दस्य उपलब्धि: भवति। उत्तररामचरिते प्रसङ्गोऽयं शम्बूकाय वैराज्यलोक: सम्प्राप्य: आसीत् अतएव सिद्धिप्राप्ति अर्थं तपस: महिमापि श्रेष्ठ: भवति इति भवभूते मतम्-

**यत्रानन्द: मोदाश्च यत्र पुण्याश्च सम्पद:।**
**वैराजा नाम ते लोकास्तैजसा: सन्तु ते शिवा:।।**[24]

आत्मज्ञानं ब्रह्मज्ञानमिति उच्यते, अतएव आत्मज्ञानेन मोक्षप्राप्ति: जायते इति भवभूतिमतम्। आत्मज्ञानं प्राप्ति अर्थं न केवलं ज्ञानस्य अपेक्षा वर्त्तते अपि च अस्माकं शरीरे अन्त:करण गुप्ता ये भवन्ति तेषाम् अपि महती भूमिका वर्त्तते यथा अहं शुन्यता, चित्त प्रसन्नता, हृदि पवित्रता, इन्द्रिय: निग्रह: मैत्रीभाव: करुणा, आचार: तथा परोपकारश्च एतदतिरीच्य “सर्वभूतेषु स्त:तथा लोकसंग्रह:”इत्यापि सिद्धान्त: मुमुर्क्षु परिपाळीय:। एवं प्रकारेण भर्त्तुहरिनाटकेषु साम्प्रतिकसमाजे परिदृशमानानां अनिष्यविचाराणां निराकरणाय पुरुषार्थचतुष्टयानां उपस्थापनं कृतमस्ति भवभूतिना-

**आविर्भूतज्योतिषां ब्रह्मणानां,ये व्याहारास्तेषु मा संशायोऽभूत्।**
**भद्रा ह्येषां वाचि लक्ष्मी र्निषक्ता नैते वाचं विप्लुतार्थां वदन्ति।।**[25]

**सहायकग्रन्थसूची-**


१. उत्तररामचरति, भवभूतजीकेभट, पापुलरबुकस्टोर, सूरत १९५३

२. .उत्तररामचरति,डॉ०पी०पी०काणेमोतीलालबनारसीदास१९६२

३. महावीरचरति, पणशीकरशास्त्रीद्वारासंशोधति, नर्णियसागरप्रेस, बम्बई१९२६

४. महावीरचरति, जे.पकिपोर्डटूबनरएण्डकम्पनी, लन्दन१८७१

५. .मालतीमाधव, सी०आर०देवधरएवंएन०पी०सूरूपुर्युसनकॉलेज, पूना१९३५६. मालतीमाधव,डॉ०आर०पी०भण्डारकरगवर्नमेंन्टसेन्ट्रलबुकडपिो, बम्बईप्र. सं.१८७६एवंद्वसिं.१९०५

७. संस्कृतआलोचना, आचार्यबल्देवउपाध्यायहिन्दीसमिति, सूचना-विभाग**,** उ.प्र. १९६३


**पादटिप्पण्यः**

1. वा. पु१४-१६
2. वैशेषिक सूत्र-१-१-२
3. म.च.२/७
4. म.च.२/३७
5. उ.रा।६/९
6. उ.रा.१/१२
7. म.च.३/२२
8. म.च.६/३६
9. म.च.६/४
10. म.च.१/११
11. म.च.१/८
12. म.च.३/३४
13. मा.मा.२/२
14. म.च.५/११
15. म.च.१/२१
16. म.च.२/२१
17. मा.मा.१/३९
18. मा.मा.२/२
19. उ.रा ६/१२
20. गीता-२-५५
21. गीता २-५६
22. म.च.१/१२
23. म.च.२/४३
24. उ.रा.२/१२
25. उ.रा.४/१८